Nikaṣa, Vol.-2, Issue-2, 2013, Pages 1-24 ISSN: 2277-6826

# विज्ञानभाष्यदृष्ट्या चतुःसूत्र्याः समीक्षणम्

धनञ्जयकुमारपाण्डेयः*
dhananjaypandeybhu@gmail.com

अखण्डं शान्तमद्वैतं सर्ववेदान्तबोधकम्।
निर्विशेषं नुमस्तत्त्वं गुरुं पशुपतिं शिवम्।।

वेदनये जयश्रीरि[१]त्युद्घोषयताऽऽचार्येण सर्वं खलु श्रुतिमाहात्म्यं प्रकट्यते। इतोऽपि सर्वविद्याप्रतिष्ठां ब्रह्मविद्यां प्रकाशयन्तो वेदान्ता विजयन्ते, नात्र काचिद् विप्रतिपत्तिः। वेदान्ततात्पर्यावगमाय ब्रह्मसूत्राण्यपि जयन्ति, जयन्तु चेति सुमनोमनोमोदायेति विश्वेशं निधाय हृदि विज्ञानभाष्यदृष्ट्या चतुरुदधिरुपायाश्चतुःसूत्र्याः समीक्षणं वितन्यत यथावेदान्तशास्त्रम्। वेदान्तो यदि शास्त्रराजस्तर्हि ब्रह्मसूत्रं ग्रन्थराज इति प्रतीयते। श्रीभगवत्पादवर्यास्त्वत्र "पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम्" इति महाकविकालिदासोक्तिं सार्थयन्तो दृश्यन्ते। किञ्च तद्वैशिष्ट्यमिति धिया सुस्पष्टमवधार्यते।

प्रथमं तावद् विश्लेषणीयं भवति कस्यचिद् वाग्विस्तरस्य फलमिति; यथा भगवत्पादाः "आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते" इति प्राहुः।[२] शारीरकभाष्यकृतां भवतां आत्मैकत्वविद्योदय एव फलमिति सूचितं मण्डितञ्च तदिति दृश्यते। अत्रापि विज्ञानाख्यभाष्ये फलत्वेन भवितव्यम्। फलन्त्विहापि तद्विद्याप्रतिपत्तिरेव। श्रूयते हि-

ब्रह्मशास्त्रार्थमीमांसासूत्राणां मधुसूदनः।
संक्षिप्तार्थं निबध्नाति वेदार्थप्रतिपत्तये।।[३]

एतेन वेदार्थप्रतिपत्तिरेव फलमिति, प्रतिपाद्यते। न हि वेदार्थप्रतिपत्तिमन्तरा, तादृशं श्रुतिश्रुतं ब्रह्मतत्त्वं ज्ञातुं शक्यते। तस्माद् वेदार्थो हि पूर्वमवधारणीयः। विज्ञानभाष्य आदावेव संशयबीजं प्रदर्शितं तच्च संशयबीजं बहुविधजगत्कारणत्वप्रतिपादनेनैवेति निर्दिष्टम्। यद्यपि ब्रह्मणः साक्षादेव कारणत्वं श्रुतिषूपलभ्यते- "यतो वा इमानि भूतानि जायन्ते"[४] इति। नात्र कश्चन संशय उदेति, यत्पदेन तदेव ब्रह्म परामृश्यते यत् सत्यं ज्ञानमनन्तं

---

* एसोसिएट प्रोफेसर, वैदिकदर्शनविभागे, संस्कृतविद्याधर्मविज्ञानसंकाये, काशीहिन्दूविश्वविद्यालये, वाराणस्याम्

[१] उदयनाचार्योक्तिः

[२] शारीरकभाष्ये उपोद्घातभाष्ये, पृ० २५

[३] विज्ञानभाष्यमङ्गलाचरणम्

[४] तैत्तिरीयोपनिषद् ३.१

ब्रह्मेति[1] श्रुत्या लक्ष्यते। तत्तर्हि विस्पष्टमेव जगत्कारणं ब्रह्म। तथापि विज्ञानभाष्ये प्रधानपरमाणुकारणवादानामपि चर्चया संशयो बोध्यते। तदेव हि प्रेक्षावद्भिः प्रतिपित्सागोचरो यत् खलु किमप्यपूर्वार्थं बोधयेत्। नहि पुरोऽवस्थिते घटे घटो न वेति संशयो जायते। प्रधानादिकारणवादानां पूर्वं निराकृतत्वादेव कुतः संशय इति प्रश्नावकाशः सम्पद्यते।

अत्र समाधिः- विज्ञानभाष्ये आदावेव यादृशः संशय उत्थापितः सः किं ब्रह्मविषयस्तदन्यो वा? कथं ब्रह्मविषयः संशय उद्घाट्यते विज्ञानभाष्यकृता, नहि ब्रह्म तत्र तत्र श्रुतिषु संदिह्यते, अपितु ब्रह्मणः स्वरूपविषयः संशयो वक्तव्यः, केचन सविशेषं केचन निर्विशेषञ्च ब्रह्म मन्वते। अतश्च स्वरूपसंशयस्य विद्यमानत्वात्तत्र श्रुतिवाक्यतात्पर्यमेव शरणमिति ज्ञातव्यम्। अन्यात्मकस्य संशयोत्थानस्य अप्रासङ्गिकत्वादयुक्तमेव स्यादिति।

तत्र विज्ञानभाष्ये-

"संदिग्धार्थश्च वेदशब्दः श्रुतोऽप्यपत्तिपन्नः स्यात्"[2] इति दृश्यते। अनेन वाक्येन वेदशब्दस्य संशयप्रतिपादकत्वमेवावगम्यते। कुतस्तर्हि प्रोच्यते कुत्रचिच्छ्रुतिषु प्रधानस्यैव कारणत्वं कुत्रचिच्च परमाण्वादीनां कारणत्वं श्रूयते; नहि तत्र विज्ञानभाष्यकृता तत्प्रतिपादिका श्रुतिर्निर्दिश्यते न वा कश्चन हेतुरेव प्रतिपाद्यते। तस्मात् संशयावतार एवायुक्त इति चेन्न, ब्रह्मप्रतिपादकश्रुतिवाक्यानां तत्कारणत्वप्रतिपादकवाक्यानाञ्च संशयावतारे कारणत्वं कथ्यते। वेदशब्दे श्रुते हि संशयो जायते तदर्थावगम इति। तस्माद् वेदवाक्यानि निर्णेतव्यानीति विज्ञानभाष्याशयो ज्ञायते। संशयस्य प्रकथनमेतद्वेदवाक्यानुशीलनार्थमेव न तदन्यदिति बोध्यम्। परमार्थतः संशय एव नास्ति।

भामत्यां तु एवमारभ्यते-

"तथाहि-बृहत्त्वाद् बृंहणत्वादात्मैव ब्रह्मेति गीयते, स चायमाकीटपतङ्गेभ्य आ च देवर्षिभ्यः प्राणभृन्मात्रस्येदकारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो विवेकेन 'अहं' इत्यसंदिग्धाविपर्यस्तापरोक्षानुभवसिद्ध इति न जिज्ञासास्पदम्"[3] इति। भामतीप्रतिपादनेनानेनात्मविषयकः संशयाभावः प्रदर्शितो विद्यते। अयं खलु शङ्काग्रन्थोऽध्यासोपपादनार्थमेव वर्ण्यते। अत एव कल्पतरौ-

---

[1] तत्रैव, २.१

[2] विज्ञानभाष्ये आदावेव, पृ० १

[3] भामत्यामादावेव, पृ० ५

"मुमुक्षुणा ब्रह्म न विचार्यं, तं प्रत्यसंदिग्धत्वात्, तथाविधकुम्भवत् तथा अप्रयोजनत्वात् काकदन्तवदिति"[१] एतादृशमनुमानं निरूपितमस्ति। अध्यासभाष्यस्योपोद्धाते प्रथमं तावद् भामत्यां ब्रह्म न जिज्ञास्यमिति शङ्काग्रन्थो निरूपितो विद्यते। नहि तत्र सर्वधर्मरहितं सच्चिदानन्दं श्रुत्यभिप्रेतं अहमिति प्रत्ययेनानुभूयते तस्माद् ब्रह्मजिज्ञासोपपद्यत एवेत्युत्तरग्रन्थानुरोधाद् यदहंप्रत्ययस्य असंदिग्धत्वं प्रतिपादितं तन्निराकृतं वेदितव्यमिति। अहंकारस्य देहालम्बनत्वे योऽहं बाल्ये पितरावन्वभवं स एव स्थाविरे प्रणप्तृननुभवामीति प्रतिसन्धानं न स्यात्, बालस्थविरशरीरयोरेकत्वानुपपत्तेः। उक्तं हि भामत्याम्-

"तस्माद्येषु व्यावर्त्तमानेषु यदनुवर्तते तत्तेभ्यो भिन्नं यथा च कुसुमेभ्यः सूत्रम्। तथा बालादिशरीरेषु व्यावर्त्तमानेष्वपि परं परमहङ्कारास्पदमनुवर्तमानं तेभ्यो भिद्यते"[२] इति। एतेन स्पष्टतयैव शरीरभेदोऽनुभूयते दृश्यते च। यमहमद्राक्षम तमेव स्पृशामीत्यहमालम्बनत्वस्य प्रत्यभिज्ञानादिन्द्रियाणामप्यालम्बनत्वं न सम्भवति। विषयेभ्यस्त्वस्य विवेकः स्पष्टमेव। एवं रीत्या तेषामनात्मत्वमेव सिध्यति। विज्ञानभाष्यकाराणां मतेऽपि ततो भिन्न एवात्मा, नान्य इति तत्रत्यभाष्यवाक्यपर्यालोचनयाऽऽयाति इति।

विज्ञानभाष्ये-

"श्रुतं तावच्छान्दोग्यबृहदारण्यकतैत्तिरीयकौषीतकैतरेयकठमाण्डूक्यमुण्डकप्रश्नश्वेता- श्वतरादिकं ब्रह्मोपनिषद्वाक्यम्" इत्युच्यते ग्रन्थादौ। तस्यापि तात्पर्यमवधारणीयम्। विज्ञानभाष्यकृता यत्तूच्यते ब्रह्मोपनिषद्वाक्यमिति स्पष्टीकरणीयम्। अनेन निरूपणेन ब्रह्मसत्त्वं बोध्यते। तस्यापि उपनिषन्मात्रगम्यत्वं लभ्यते। विज्ञानभाष्यकृतोपनिषदां प्रामाण्यमपि समर्थ्यते ब्रह्मस्वरूपाधिगमे। यतो ह्ययं ग्रन्थः संक्षिप्तार्थमेवावबोधयति, तस्माद् ग्रन्थस्यास्य ब्रह्माद्वैतप्रस्थानमेव निरूपणीयमिति प्रतीयते। अतश्च विज्ञानभाष्यस्यास्य यथाऽद्वैतं विवरणाय प्रयत्यते। तत्र हि विज्ञानभाष्ये अथातो ब्रह्म जिज्ञासेत्यारभ्य तत्तुसमन्वयादिति सूत्रं यावत् एकीकृत्यैवोपन्यासो विद्यते। न हि तत्र एकैकमधिकरणमुपन्यस्य भाष्यविरचनम्। चतुर्णां सूत्राणां एकत्रीकरणस्य किमपि प्रयोजनं भाष्ये नोक्तम्। तथापि परस्परसम्बद्धान्येतानि सूत्राणीति प्रस्थानविदो विद्वांसः स्वीकुर्वते। अधुनाऽथातो ब्रह्मजिज्ञासेति सूत्रमनुसृत्य निरूप्यते। विज्ञानभाष्ये अथशब्दः आरम्भार्थक एव निरूपितो विद्यते। उक्तञ्च-

"अतः कारणात् तद्ब्रह्मेत्यारभ्य विशिष्य ज्ञातुमिष्यते। अत्र ब्रूमः"[३] इति। अत्र यद्यपि यथाश्रुतं भाष्यं किञ्चिदन्यदेव बोधयति यत्र शारीरकभाष्यस्य कथमपि तात्पर्यं नास्ति, तथापि सुकुमारमतीनां कृते

---

[१] कल्पतरौ, पृ० ५

[२] भामत्याम्, पृ० ३

[३] विज्ञानभाष्ये प्रथमसूत्रे

एतद्व्याख्यानमवतारणार्थं वेदान्तमीमांसायामावश्यकमस्तीति प्रतीयते। विद्वान्स एव निश्चयमधिगमिष्यन्त्येतद्भाष्याशयं विदित्वा। वस्तुतस्तु शारीरकभाष्यकृता भगवत्पादेनेदं प्रतिपादितमस्ति, तद्यथा-

"तत्राथशब्द आनन्तर्यार्थः परिगृह्यते"[१] इति

अथशब्दस्य चत्वारोऽर्थाः प्रसिद्धाः लोके-आनन्तर्यम्, अधिकारः, मङ्गलम्, प्रकृतादर्थात् अर्थान्तरं चेति। नाथशब्द आरम्भार्थक इति वक्तुं युक्तम्। शारीरकभाष्ये नाधिकारार्थः, "ब्रह्मजिज्ञासाया अनधिकार्यत्वात्" इति प्रतिपाद्यते। एतत्तात्पर्यं प्रकटार्थविवरणे "अथ योगानुशासनमितिवद् ब्रह्मज्ञानेच्छाया अनारभ्यत्वात्, न तावत् सोत्पाद्यतया... प्रत्यधिकरणमप्रतिपाद्यत्वादिति भावः"[२] इति निरूपितमस्ति। एवञ्च विज्ञानभाष्यकृता यदुच्यते इत आरभ्य इत्येतदयुक्तमेव प्रतिभाति। नह्यत्र ब्रह्मणो जिज्ञासा प्रारभ्यते। ब्रह्मज्ञानेच्छायाः शास्त्रारम्भात् पूर्वमेव सिद्धत्वात्। भाष्यरत्नप्रभायामपि शारीरकभाष्यवचनं समर्थ्यते-तद्यथा-

"किं जिज्ञासापदं ज्ञानेच्छापरमुत विचारलक्षकम्? आद्येऽथशब्दस्यारम्भार्थत्वे ब्रह्मज्ञानेच्छारभ्यत इति सूत्रार्थः स्यात् स चासंगतः, तस्या अनारभ्यत्वात्। नहि प्रत्यधिकरणं इच्छा क्रियते किंतु तया विचारः। न द्वितीयः, कर्तव्यपदाध्याहारं विना विचारलक्षकत्वायोगात्, अध्याहृते च तेनैवारम्भोक्तेरथशब्दवैयर्थ्यात्। किन्त्वधिकारिसिद्ध्यर्थमानन्तर्यार्थतैव युक्तेति"[३] इति। किन्तु विज्ञानभाष्यकृतां दृष्टौ अन्यदेवास्ति किञ्चिद् वचः। यद्यपि ब्रह्मस्वरूपविषये तेऽद्वैतपक्षमेवाभ्युपगच्छन्ति। सूत्रपदानि तु तैरन्यथैव प्रतिपाद्यन्ते व्याख्यायन्ते च।

अत एवोक्तम्-

"तस्मात् संशयोत्पत्तेस्तन्निवृत्त्यर्थं सर्वेषां कारणवाक्यानां परस्परैकवाक्यतया समन्वयार्थं चोत्तिष्ठते ब्रह्मयाथार्थ्यजिज्ञासा। अत आवश्यकोऽयं ब्रह्मकारणताविचारारम्भः"[४] इति। एतेन भाष्यसन्दर्भेण भाष्यकृतः पक्षः अथशब्दार्थाभिप्रेतः प्रदर्शितो भवति। यतो हि प्रधानपरमाण्वादीनां जगत्कारणतायां सत्यां संशये ब्रह्मविचारः करणीयः।

---

[१] अथातो ब्रह्मजिज्ञासासूत्रे १.१.१

[२] प्रकटार्थविवरणे १.१.१

[३] प्रथमसूत्रस्य भाष्यरत्नप्रभायाम्

[४] प्रथमसूत्रभाष्ये श्रीमधुसूदनः

अत्रेदं वक्तव्यम्- अवश्यमेव आब्रह्मज्ञानाद् विज्ञानभाष्यकृताऽपि लोकव्यवहारो मन्तव्यः स्यात्। तथा च नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयमपि तैः स्वीकर्तव्यम्। नह्येतत् साधनचतुष्टयं निराक्रियते श्रीमधुसूदनवर्यैः, तेन तत्र तेषां सम्मतिरेव प्रतीयते। अन्यच्च वेदान्तमीमांसायामत्र भगवत्पादैरपि समेषां वेदान्तवाक्यानामखण्डे ब्रह्मणि तात्पर्यं स्थाप्यते संशयादीनां तादृशां निराकरणमप्यकारि। अर्थतः सन्दर्भेऽस्मिन् ओझामहोदयस्य, अद्वैतपक्षरुचिरेव नारुचिरिति प्रतीयते। न तु विज्ञानभाष्यकारैः अथशब्दस्य तादृशं किमपि विवरणं यादृशं वेदान्तग्रन्थेषु दृश्यत उक्तम्। अथ च चिन्तनीयमेतद्भाष्यमिति। अधुना अथातो ब्रह्मजिज्ञासेत्यत्र अतः शब्दोऽपि विचारणीयः। भगवत्पादास्त्वत्र वदन्ति- "अतः शब्दो हेत्वर्थः यस्माद्वेद एवाग्निहोत्रादीनां ज्ञेयः साधनानामनित्यफलतां दर्शयति तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिः।"[१] इति। अस्य भावोऽपि प्रकटार्थविवरणे प्रकाशितः-

अस्यायमर्थः-

अथेति मुमुक्षुत्वानन्तरं ब्रह्मजिज्ञासा कर्तव्येति प्रवृत्तिसिद्धयेऽनुवादपरिहाराय च कर्तव्यपदाध्याहारेण तावदन्वयः। तत्र ब्रह्मजिज्ञासैव मुमुक्षुणा किमिति कर्तव्या, आवृत्त्या कर्म कस्मान्न क्रियत इति हेत्वाकाङ्क्षायामाह- अतो लोकवेदप्रसिद्धाद्धेतोरिति। तमेव हेतुं स्फुटयति इति"[२] एतेन व्याख्यानेनेदं कथ्यते यदात्मा वाऽरे द्रष्टव्य इति श्रुतिप्रतिपादितमात्मदर्शनं परमपुरुषार्थत्वेनाकर्ण्यते नान्यद्दर्शनमिति। तस्यैव दर्शनस्य "यो वै भूमा तत्सुखम्"[३] इति श्रुत्या माहात्म्यमपि वर्ण्यते। "यदल्पं तन्मर्त्यम्"[४] इति श्रुत्या च अन्यदर्शनस्य वारणमपि क्रियते। तस्मादात्मजिज्ञासोपपाद्यते शास्त्रेषु। कस्मात् कारणाद् ब्रह्मैव जिज्ञास्यमित्याशङ्कायामात्मव्यतिरिक्तानां समेषामनित्यत्वं आत्मनो नित्यत्वञ्च "न स पुनरावर्तते" इति श्रुत्याऽऽयाति। "ब्रह्मविदाप्नोति परम्"[५] इत्यादिना निरस्तसमस्तदुःखं निरतिशयानन्दं परं पुरुषार्थं मोक्षं श्रुतिर्दर्शयति। अतो मुमुक्षुणा साधनसम्पत्त्यनन्तरं ब्रह्म जिज्ञास्यम्। विज्ञानभाष्ये तु "श्रुतं तावद्वेदशास्त्रम्। श्रुतं च तत्र जगत्कारणतया ब्रह्म नाम। अथातो हेतोः ब्रह्मजिज्ञासा भवति यतो हेतोरस्य ब्रह्मणोऽन्यस्मात् कुतश्चिज्जन्मादि श्रूयते"[६] इति प्रतिपादितं भवति।

---

[१] शारीरकभाष्ये १.१.१

[२] प्रकटार्थविवरणे- तत्रैव व्याख्यायाम्

[३] छान्दोग्योपनिषत् ७.२३

[४] छान्दोग्योपनिषत् ७.२४.१

[५] तैत्तिरीयोपनिषद् २.१

[६] तत्रैव विज्ञानभाष्ये

अस्यार्थः-

विज्ञानभाष्यकृन्मते ब्रह्मणो जगज्जन्मादि श्रूयते, तथैव अन्यस्मादपि कारणाज्जगज्जन्मादिकं श्रूयते, अतो जगज्जन्मादिकारणत्वप्रतिपत्तये ब्रह्म जिज्ञास्यमित्यर्थः। अत्र हि नित्यानित्ययोः काचिच्चर्चा न कृता विद्यते भाष्यकृता। अपितु यत् किञ्चित् अत इति पदमनुसृत्योक्तं तेन अन्यदेव व्याख्यानमिति प्रतीयते। मन्ये कश्चनाभिनवः पन्थाः उद्घाट्यते तस्मात् पूर्वाचार्याशयो न वर्णितः। ब्रह्मणो जिज्ञासा ब्रह्म जिज्ञासेति षष्ठीसमास एवादरणीयः। तथापि कर्मण्येव षष्ठी न शेषे। ननु ब्रह्मणो जिज्ञासेत्युक्ते ब्रह्मसम्बन्धिनी जिज्ञासेति प्रतिपादितं भवति। एवञ्च ब्रह्म स्वरूपप्रमाणयुक्तिसाधनप्रयोजनजिज्ञासाः सर्वा एव ब्रह्मजिज्ञासया प्राप्यन्ते तेषां समेषां साक्षात्परम्परया वा ब्रह्मसम्बन्धात् तत्कथं कर्मण्येव षष्ठी इत्युच्यते। अत एव श्रीवाचस्पतिमिश्रैरुच्यते-

"इच्छायाः प्रतिपत्त्यनुबन्धो ज्ञानं, ज्ञानस्य च ज्ञेयं ब्रह्म। न खलु ज्ञानं ज्ञेयं विना निरूप्यते, न च जिज्ञासा ज्ञानं विनेति प्रतिपत्त्यनुबन्धत्वाज्जिज्ञासा प्रथमं कर्मैवापेक्षते, न तु सम्बन्धिमात्रम्। तदन्तरेणापि सति कर्मणि तन्निरूपणात्। नहि चन्द्रमसमादित्यं चोपलभ्य कस्यायमिति सम्बन्ध्यन्वेषणा भवति। भवति तु ज्ञानमित्युक्ते विषयान्वेषणा किं विषयमिति। तस्मात् प्रथममपेक्षितत्वात् कर्मतयैव ब्रह्म संबध्यते, न सम्बन्धितामात्रेण, तस्य जघन्यत्वात् तथा च कर्मणि षष्ठीत्यर्थः"[१] एतेन कर्मण्येव षष्ठी युक्ता। एतद्विषये भगवत्पादैरपि उक्तम्-

यतो वा इमानि भूतानि जायन्त इत्याद्याः श्रुतयः 'तद्विजिज्ञासस्व तद्ब्रह्म' इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयन्ति। तच्च कर्मणि षष्ठीपरिग्रहे सूत्रेणानुगतं भवतीति। ज्ञातुमिच्छा जिज्ञासा। इच्छायाः कर्म तावद् ब्रह्मसाक्षात्कारपर्यन्तं ज्ञानमेवोपयुज्यते। तस्यैव ज्ञानस्याविद्योच्छेदकत्वमवगम्यते।[२] एतदुक्तं भामत्याम्-

"न खलु तज्ज्ञानं विना सवासनविविधदुःखनिदानमविद्योच्छिद्यते। न च तदुच्छेदमन्तरेण विगलितनिखिलदुःखानुषङ्गानन्दघनब्रह्मात्मतासाक्षात्काराविर्भावो जीवस्य। तस्मादानन्दघनब्रह्मात्मतामिच्छता तदुपायो ज्ञानमेषितव्यम् इति।[३] एतेन ब्रह्मावगतेः पुरुषार्थत्वमपि निरूपितं वेदितव्यम्। विज्ञानभाष्येऽपि अथातः परमेतद् ब्रह्म तटस्थलक्षणतः स्वरूपलक्षणतश्च विज्ञातुमपेक्षामहे"[४] इति वाक्येन ब्रह्मणो जिज्ञासाकर्मत्वं प्रतिपादितं भवति। विज्ञानभाष्यकृद्दृष्ट्याऽपि तद् ब्रह्म तथैव वर्णितं स्याद् यथोपवर्णितमस्ति शारीरकभाष्यादौ। आरम्भ एव श्रीमधुसूदनवर्यैस्तद् ब्रह्म विशिष्य ज्ञातुमिष्यते इति प्रतिपादितम्। तेन ब्रह्मणः जिज्ञासाकर्मत्वं तथैव प्रतिपादितं भवतीति न काचिद् विप्रतिपत्तिः।

---

[१] भामत्याम् १.१.१, पृ० ३९

[२] तत्रैव शारीरकभाष्ये, पृ० ४०

[३] तत्रैव भामत्याम्

[४] विज्ञानभाष्ये आदावेव

विज्ञानभाष्यस्यादौ संक्षिप्तार्थं निबध्नातीत्युक्तेन ग्रन्थेनावश्यमेव क्वचित् ब्रह्मसूत्राणां व्याख्यानं विस्तरेण भवितव्यम् इति।

अथ च विज्ञानभाष्यकृता यदुक्तं "इत्येवमनेकधा भवत्यत्र संशयः"[१] नायं कश्चन विशेषः प्रतिपादितः। शारीरकभाष्यकृताऽपि- "एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः तत्राविचार्य यत्किंचित् प्रतिपद्यमानो निःश्रेयसात् प्रतिहन्येत, अनर्थं चेयात्। तस्माद् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते"[२] इति प्रतिपादितम्। एतेन वेदान्तमीमांसायाः जिज्ञासायाश्चोभयोः उद्देश्यमपि वर्णितं भवति। नह्येतादृशं किञ्चिद् विज्ञानभाष्यकृतोक्तमिति न शङ्क्यम्। तेषामाशयोऽत्र समग्रभाष्यावलोकनेनावगम्यते। तस्माद् ब्रह्मजिज्ञासा कर्तव्येति सिध्यति।

ननु अथातो ब्रह्मजिज्ञासेति सूत्रेण निर्विशेषं ब्रह्म जिज्ञास्यते सविशेषं वा, उत वा किञ्चिदन्यदेवेति। भगवत्पादवचनेन निर्विशेषमेव ब्रह्मजिज्ञासाविषयीभूतमवगम्यते। जिज्ञासाधिकरणे भगवत्पादाः प्राहुः- "ब्रह्म च वक्ष्यमाणलक्षणं जन्माद्यस्य यत इति।"[३] नहि जन्माद्यस्य यत इति सूत्रेण निर्विशेषादन्यद् ब्रह्म प्रतिपादितं भवति। तत्रैव निर्विशेषे ब्रह्मणि वेदान्तानां समन्वयदर्शनात् तदेव जिज्ञास्यं नान्यदिति नात्र शङ्काऽवसरः। विषयसंशयपूर्वपक्षसिद्धान्तफलात्मकेऽधिकरणे निर्विशेषस्यैव श्रुतितात्पर्यविषयत्वात्तदेव जिज्ञास्यम्।

"एवञ्च जन्माद्यस्य यतः" इति द्वितीयेन सूत्रेण ब्रह्मलक्षणं प्रकाश्यते। लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति प्रामाणिकवचनेन लक्षणं तावद् ब्रह्मस्वरूपप्रतिपत्त्यर्थं निरूप्यते। द्विविधं हि लक्षणं भवति स्वरूपलक्षणं तटस्थलक्षणञ्चेति। "यतो वा इमानि भूतानि जायन्ते"[४] इत्यादीनि हि लक्षणानि ब्रह्मबोधकानि दृश्यन्ते। ननु तटस्थलक्षणेनापि ब्रह्मस्वरूपमेव बोध्यते, तत्कथं स्वरूपलक्षणस्य माहात्म्यम् इति चेन्न, स्वरूपलक्षण-तटस्थलक्षणयोरुभयोरपि ब्रह्मस्वरूपबोधकत्वं समानमेव तथापि स्वरूपवाचकपदैः स्वरूपप्रतिपादकपदैर्वा यत्र ब्रह्म बोध्यते तत् स्वरूपलक्षणमित्युच्यते। अत एव स्वरूपमेव लक्षणं स्वरूपलक्षणमिति प्रतिपाद्यते। यथा सत्यं ज्ञानमनन्तं ब्रह्मेति स्वरूपलक्षणत्वेन दृश्यते। इदं च जन्माद्यस्य यत इति सूत्रं तटस्थलक्षणत्वेन ब्रह्म संगिरते। उक्तञ्च शारीरकन्यायसंग्रहे- "तत्र यथा 'यत्र शाखाग्रं स चन्द्रः' 'प्रकृष्टप्रकाशश्चन्द्रः' इत्युपलक्षणस्वरूपलक्षणाभ्यां विशिष्टश्चन्द्रः प्रतीयत एवं वक्ष्यमाणं जगन्निमित्तोपादानकारणत्वं सिद्धवत्कृत्य यज्जगतो जन्माद्युपादाननिमित्तकारणं तद् ब्रह्म इति मिथ्याभूतेनापि प्रपञ्चजन्मादिकारणत्वेन 'यद्रजतमभात् सा

---

[१] शारीरकभाष्यम् १.१.१, सूत्रस्य भाष्यान्ते

[२] शारीरकभाष्यस्य प्रथमसूत्रभाष्यान्ते १.१.१

[३] शारीरकभाष्ये- १.१.१

[४] तैत्तिरीयोपनिषद्-३.१

शुक्तिरितिवद् ब्रह्माद्वितीयानन्तशब्दानां च स्वार्थप्रक्षेपेण अद्वितीयं जगत्कारणं ब्रह्म इत्युपलक्ष्य पुनस्तस्य मायाविशिष्टस्य कारणत्वात् तथैव ब्रह्मत्वे प्राप्ते सत्यानन्दादिविशेषलक्षणोपादानेन विशुद्धं ब्रह्म लक्ष्यते इत्युभयविधलक्षणेन जिज्ञास्यब्रह्मनिर्णयो दर्शितः।"[१] इति।

अस्यायमर्थः-

असाधारणधर्मो हि लक्षणं भवति कस्यचित् स्वरूपाधिगमविषये न हि तन्निर्विशेषं समस्तधर्माधर्मविवर्जितं केनचिदसाधारणधर्मवत्वेन भवितव्यम्। तथाप्यध्यारोपापवादन्यायेन, क्वचित् तटस्थलक्षणेनोक्तेन क्वचिच्च स्वरूपलक्षणेन बोध्यते। प्रतीयानं हि जगत् केनचिद् कारणेन भवितव्यम्। यत इति पञ्चमी ब्रह्मण उपादानत्वं विवर्तमानतयैव वक्ति। विवर्तोपादानत्वं च जगतस्तत्राध्यस्तत्वं विना नोपपद्यत इति निर्विशेषोपपादकतायामेव स्वरसम् स्वारस्यञ्च। तेन च ब्रह्म सगुणमपि, निर्गुणमपि। सगुणत्वमविद्ययाऽवृतत्वमपेक्ष्य विशेषाधिष्ठानतया, निर्विशेषत्वमानन्दादिना रूपेणाज्ञानेऽनाद्यविद्यानिवृत्त्युपलक्षितनिर्विशेष- सन्मात्रतयेति सर्वासां श्रुतीनां स्वरससमन्वयः। इति।

विज्ञानभाष्ये-

"तदेवेह ब्रह्मतत्त्वं विवक्ष्यते यतोऽस्य विश्वस्य जन्मस्थितिभङ्गं भवति"[२] इति द्वितीयसूत्रविषये व्याख्यानं दृश्यते। "अथातः परमेतद् ब्रह्म तटस्थलक्षणतः स्वरूपलक्षणतश्च विज्ञातुमपेक्षामहे"[३] इत्यादिना विज्ञानभाष्यस्य लक्षणद्वैविध्यस्वीकृतौ पक्षः। अद्वैतराद्धान्त एव भाष्यकृता समर्थितः। अग्रे विज्ञानभाष्ये "ब्रह्मशब्देन तदुच्यते यतोऽस्य सर्वस्य जन्मस्थितिभङ्गं भवति" इति उक्तम्। अत्र ब्रह्मैव जगत्कारणमिति प्रतिपाद्यते नान्यदिति। यत्तु विज्ञानं ब्रह्मेति कथ्यते तत् समीचीनमेवाद्वैतपक्षेऽपि। "स्वतन्त्रं हीदं शास्त्रं ब्रह्मविज्ञानपरम्"[४] इत्यपि तथैवाद्रियते, 'तदित्थं न कश्चन विरोधः। भगवत्पादस्य नैपुण्यप्रतिपादने व्याख्यानत्वेनोपन्यस्तोऽयं ग्रन्थः पर्याप्तः। कोऽयं ग्रन्थ इति उच्यते- "जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः।"[५] जन्मस्थितिभङ्गं समासार्थः। अन्यपदार्थप्रधानो हि बहुव्रीहिसमास इति। विशेष्यस्य, प्रधानस्यैकदेशमेव विशेषणं कृत्वा समासः इत्यर्थः। यथेह जन्म आदिरस्य जन्मादेरिति विशेष्यस्य जन्मादेरेवैकभूतं जन्म विशेषणमित्यर्थः। अत्र भगवान् भाष्यकारः

---

[१] शारीरकन्यायसंग्रहे १.१२

[२] विज्ञानभाष्ये १.१.२

[३] तत्रैव, विज्ञानभाष्ये

[४] तत्रैव, विज्ञानभाष्ये

[५] शारीरकभाष्यम् १.१.२

श्रीशङ्करः- "ब्रह्मजिज्ञासितव्यमित्युक्तम्। किं लक्षणं पुनस्तद्ब्रह्मेत्यत आह भगवान् सूत्रकारः"[१] इति सूत्रसङ्गतिं वर्णयति। अनेन जन्माद्यस्य यतः इति सूत्रेण सूत्रकृता किमपि परिह्रियत इति श्रीवाचस्पतिमिश्रास्तावद् वदन्ति- "तत्र यथावदनुभूयते तत्सर्वं परिमितं अविशुद्धमबुद्धं विध्वंसि, न तेनोपलब्धेन तद्विरुद्धस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य ब्रह्मणः स्वरूपं शक्यं लक्षयितुं.....तस्माल्लक्षणाभावात्, न ब्रह्म जिज्ञासितव्यमित्याक्षेपाभिप्रायः। तमिममाक्षेपं भगवान् सूत्रकारः परिहरति- जन्माद्यस्य यतः इति। मा भूदनुभूयमानं जगत्तद्धर्मतया तादात्म्येन वा ब्रह्मणो लक्षणं, तदुत्पत्त्या तु भविष्यति"[२] इति। एतेन सूत्रस्य लक्षणप्रतिपादकत्वमुच्यते। पञ्चपादिकायां तु विशेषोऽयं दृश्यते[३]- तृतीयलिङ्गनिर्देशात् संहतिप्रधानं समासार्थः इति अस्य जगतो यतः जन्मस्थितिभङ्गं जायते तद् ब्रह्म इति सरलार्थः। नन्विदं शब्दः किञ्चिदेव सन्निहितं गमयति नाखिलं जगदिति चेन्न सोचकारणाभावात्प्रत्यक्षादिसन्निधापितं समस्तं जगद् गृह्यते। जन्मादीनां जगतश्च सर्व एव

सम्बन्धः सम्भवति। अत एवोक्तम्- "किं सतो जन्मादिसम्बन्धः? उतासतः? नाद्यः, जन्मनः प्राक् सत्त्वासम्भवात्, सतो नाशानुपपत्तेश्च। नाप्यसतो जन्मनाशादिसम्भवः सम्भवी, नृशृवत्, नापि स्थितिसंबन्धः, तस्य भेदादिनाऽनिरूपणादिति चोद्यार्थः।। अनिवर्चनीयत्वादस्मिन् मते सर्वोऽपि सम्बन्धः सम्भवति"।[४] इति।

अत्रेदं वक्तव्यं भवति यज्जगज्जन्मादिकारणत्वं न लक्षणान्तर्गतं ब्रह्मणो निर्धर्मकत्वात्। तस्माज्जगज्जन्मादिकारणत्वमेवोपलक्षणम् "आत्मनः आकाशः सम्भूतः"[५] इत्यादिना साक्षाद् ब्रह्मणः कारणत्वप्रतिपत्तेः। पञ्चपादिकाविवरणे[६]- ननु निमित्तकारणत्वमुपादानकारणत्वमुभयं वोपलक्षणत्वेनोच्यते इत्यादिना शङ्कामुत्थाप्य अन्ते "तथाचेदं जगद् अभिन्ननिमित्तोपादानं भवितुमर्हति प्रेक्षापूर्वकजनितकार्यत्वात् आत्मगतसुखदुःखरागद्वेषादिवत्। एवञ्चैकस्य उभयकारणत्वं लक्षणेनानेन निर्दिष्टं वेदितव्यम्। भगवत्पादेनापि[७]- "शब्दश्चेक्षितुरीश्वरस्य प्रकृतित्वं प्रतिपादयतीत्यवोचाम" इत्यादिना उभयकारणत्वमाद्रियते। 'अनेन

---

[१] तत्रैव, द्वितीयसूत्रात्पूर्वम्

[२] भामत्याम् १.१.२

[३] पञ्चपादिकायां पञ्चमवर्णके

[४] पञ्चपादिकातत्वदीपनव्याख्यायाम्- पञ्चमवर्णके- पृ० ५१७

[५] तैत्तिरीयोपनिषद् २.१

[६] पञ्चपादिकाविवरणे- तत्रैव, पृ० ५२०

[७] शारीरकभाष्यम् १.४.२७

जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'[१] इति श्रुत्या ब्रह्मणः कर्तृत्वं स्पष्टतयैव प्रतिपाद्यते। ब्रह्ममीमांसाशास्त्रेऽस्मिन् जीवब्रह्मणोरनन्यत्वं हि प्रतीयत, तस्माद् वेदान्तग्रन्थेषु सर्वत्रापि शास्त्रस्यास्य जीवब्रह्मणोरैक्यमेव प्रयोजनं निर्धार्यते। न हि उभयविधकारणत्वस्वीकृतिमन्तरा एतादृशं प्रयोजनमैक्यलक्षणं वक्तुं शक्येत। तत्र तत्र ब्रह्मणः एकविज्ञानात् सर्वविज्ञानमपि श्रूयते, न ह्यभिन्ननिमित्तोपादानकारणत्वेन विना एतादृशं किञ्चिदुपपन्नं स्यात्। निर्विशेषस्य जिज्ञासाऽनन्तरं अभिन्ननिमित्तोपादानकारणत्वप्रतिप्रत्यर्थमेव सूत्रकृता भगवता लक्षणमभाणि जन्माद्यस्य यत इति। ननु सगुणत्वमेव लक्षणेन ब्रूयात्कथं निर्गुणत्वमिति चेन्न निर्गुणत्वस्यैव सकलश्रुतितात्पर्यगोचरत्वात् तस्यैवोपव्याख्यानत्वेन लक्षणादिकमिति ज्ञातव्यम्। सगुणत्वप्रतिपादने प्रयोजनाभावात् तत्र लक्षणकथनमयुक्तमेवेति प्रतिभाति।

ननु प्रधानकाललोकपालयदृच्छास्वभावादिषु जगत्कारणेषु लक्षणस्यैतस्य अतिव्याप्तिदोषग्रस्तत्वादलक्षणत्वमेव स्यादिति। अन्यच्च जगत्कारणत्वमुपलक्षणमुपपादयन् स्वरूपलक्षणं तावद् भगवत्पादेनोक्तम्। उक्तमेतद् भगवत्पादीयभाष्योक्तिसमर्थने पञ्चपादिकाकृता- "अस्य जगतः इत्यादिना भाष्येण लक्ष्यस्य ब्रह्मणः स्वरूपलक्षणं कथयितुमुपक्रमते। द्विविधं हि लक्षणम्- उपलक्षणं विशेषणलक्षणञ्च। तत्रेदं लक्षणं प्रपञ्च- धर्मत्वात् पृथग्भूतमेव कारणमुपलक्षयति न विशेषणत्वेन। अतः पृथक् स्वलक्षणकथनम् इति।"[२] एतेन आचार्यपद्मपादभाष्यविवरणेन भगवत्पादीयभाष्यस्यानुवादकत्वं निरस्यते। भगवत्पादैः सूत्रस्य पदार्थाभिधानपूर्वकं निःशेषवाक्यार्थप्रतिपत्तये भाष्यं प्रत्यपादि- तद्यथा- "अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियत- देशकालनिमित्तक्रियाफलाश्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद् भवति तद्ब्रह्मेति वाक्यशेषः"[३] इति। एतेन अतिव्याप्त्यादिदोषोऽपि निराकृतो वेदितव्यः। वेदान्तकल्पतरुकृन्मतेऽपि अस्य जगत इत्यादिभाष्यवचनमतिव्याप्त्यादिदोषपरिहारार्थमेवेति दृश्यते। मनसाप्यचिन्त्यरचनारूपस्येति भाष्यव्याख्याने तावद्- भामत्यां स्पष्टीकृतम्- "एकस्या अपि हि शरीररचनाया रूपं मनसा न शक्यं चिन्तयितुं कदाचित्, प्रागेव जगद्रचनयाः, किम पुनः कर्तुमित्यर्थः"।[४] अनेन जीवकर्तृकत्वनिषेधोऽप्यवगन्तव्यः।

अत्रेदं विचारणीयम्-

भामतीप्रस्थाने विवरणप्रस्थाने च एतस्य सूत्रस्य समानमेव व्याख्यानं कृतं विद्यते। विज्ञानभाष्ये श्रीमधुसूदनेन तदेवेह ब्रह्मतत्त्वं विवक्ष्यते यतोऽस्य विश्वस्य जन्मस्थितिभङ्गं भवति इति द्वितीयसूत्रार्थो

---

[१] छान्दोग्योपनिषद् ६.३.२

[२] पञ्चपादिकायाम् पञ्चमवर्णके, पृ० ५२५

[३] शारीरकभाष्यम् १.१.२

[४] भामत्याम् १.१.२

निगदितः। अत्र पूर्वोक्त एव जन्मादि इत्यस्य व्याख्यानं वेदितव्यम् यतो हि यथा भगवत्पादैर्जन्मस्थितिभङ्गं समासार्थः इत्युच्यते तथैव श्रीमधुसूदनवर्यैरपि स एव समासार्थः स्वीक्रियते नान्यः। विज्ञानभाष्यस्यारम्भ एव "श्रुतं च तत्र जगज्जन्मादिकारणत्वेन किञ्चिद् ब्रह्मतत्त्वम्"[१] इति प्रतिपाद्यते तस्यापि प्रतिपादनस्य अद्वैतलक्षणे निर्विशेषे ब्रह्मणि एव तात्पर्यं पश्यामः। "यतोऽस्य विश्वस्य जन्मस्थितिभङ्गं तत्रोपनिषच्छास्त्रे प्रतिज्ञातम्। जगज्जन्मादेरेव प्रतिपाद्यतयोपनिषच्छास्त्रयोनित्वात्"[२] इति विज्ञानभाष्यावलोकनेनापि औपनिषदपक्ष एवालङ्क्रियते विदुषा श्रीमधुसूदनाचार्येण। तत्रैव "ननूपनिषद्भ्य एवास्य तटस्थलक्षणं विज्ञातमिति न तदर्था जिज्ञासाऽवकल्पते इति चेन्न तत्तु जगज्जन्मादिकर्तृत्वं ब्रह्मणि सर्वेषां वेदान्तवाक्यानां समन्वयात् सिद्धं भवेत्"[३] इति वचनेन सूत्रकारस्यैव पक्षः भाष्ये स्पष्टीक्रियते। एतत्सूत्रसन्दर्भे विज्ञानभाष्येऽपि ब्रह्मण अभिन्ननिमित्तोपादानत्वमेव व्यवस्थाप्यते। 'तेनास्य विज्ञानस्य सर्वजनकत्वमुपपद्यते। विज्ञानं च ब्रह्म तस्माद् ब्रह्मैवेदं जगज्जन्मादिकारणमिति सिद्धम्।"[४] इत्यादिना विज्ञानस्य नाम चिद्रूपस्य ब्रह्मणो हि जगत्कारणत्वं प्रतिपाद्यते। विज्ञानपदेनात्र स्वरूपभूतं ज्ञानमेवादरणीयं नान्यदिति। तस्मात् भाष्येणानेन तथैव कर्तृत्वं ब्रह्मणः प्रकृतित्वञ्चायाति, यथा उपनिषत्सु तात्पर्यग्राहकलिङ्गैर्बोध्यते। 'संख्यादयश्चान्ये तंत्रकाराः अनेकधाऽस्मिन् जगत्कारणे विप्रवदन्ते'[५] इत्यादिना अन्यान्यप्रधानकारणवादानां निराकृतिरपि बोध्यते। एवञ्च विज्ञानभाष्यपक्षोऽपि वेदान्तसम्प्रदायानुप्राणित एवेति दृश्यते नात्र काचिद् विप्रतिपत्तिः।

"जन्माद्यस्य यतः" इति सूत्रेण ब्रह्मणः सर्वज्ञत्वं सर्वशक्तित्वञ्च वेदान्तमीमांसायां प्रतिपादितम्। किमत्रावशिष्टमिति धिया, शास्त्रयोनित्वाधिकरणे उक्ते ब्रह्मणि प्रमाणमपि प्रदर्श्यते। एतन्निरूपणावसरे भामत्यां निगदितम्- "न केवलं जगद्योनित्वादस्य भगवतः सर्वज्ञता, शास्त्रयोनित्वादपि बोद्धव्या।"[६] इति। कल्पतरुकृताऽपि-

अथवा वेदनित्यत्वाद् ब्रह्मणो विश्वयोनिता।
नेति शङ्कामपाकर्तुं शास्त्रयोनित्वमुच्यते।। [७]

---

[१] विज्ञानभाष्ये १.१.४

[२] तत्रैव, १.१.१

[३] तत्रैव विज्ञानभाष्ये १.१.१

[४] तत्रैव

[५] तत्रैव

[६] भामत्याम् १.१.३

[७] कल्पतरौ १.१.३

इति, श्लोकेन पूर्वसूत्रसङ्गतिः प्रदर्शिता। परिमले अस्य व्याख्यानावसरे- “पूर्वसूत्रार्थाक्षिप्तसर्वज्ञत्वदृढीकरणार्थतयेह वेदकर्तृत्वं व्यवस्थापनीयमासीत्, तेनार्थाद् ब्रह्मणः सर्वकारणत्वमनुपपन्नं वेदस्य नित्यत्वादिति शङ्कानिराकरणमपि लभ्यत इत्यानुषकिार्थकथनपरोऽयं श्लोकः”[१] इति दीक्षितवर्यैरभाणि।

अत्रेदं तात्पर्यम्-

सूत्रेणैतेन ब्रह्मणः शास्त्रप्रमाणकत्वं प्रत्यक्षादिप्रमाणाविषयत्वेऽपि प्रतिपाद्यते। ननु निर्विशेषब्रह्मविचारं प्रदर्शयतो भगवतः सूत्रकृतः सविशेषस्यात्मनः सर्वज्ञत्वोपपादनं नैव समीचीनं पश्यामः। कश्चनान्योऽपि जगत्कारणं स्यादिति शङ्काऽपाकरणायैव सर्वज्ञत्ववचनम्। न च ब्रह्मणः सर्वज्ञत्ववत्सर्वशक्तिकत्वमप्यर्थलभ्यं तदपि न केनचिद् हेतुना दृढीकृतं तदेवानेन निवर्त्यत इति चेन्न “अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेद” इत्युपक्रम्य “अयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानीति” नामरूपात्मकप्रपञ्चस्याप्रयत्नसाध्यब्रह्मकार्यत्वादिति। वस्तुस्तु हेत्वन्तरेणात्र सर्वज्ञत्वं दृढीक्रियत इति। तस्मात् सम्यगुच्यते भगवत्पादेन-

“महतः ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म”।[२] इति

अस्यार्थः-

ऋग्वेदादिशास्त्राणां महत्त्वं न केवलं महाविषयत्वेनापितु अनेकाङ्गोपाङ्गकरणतयेति बोद्धव्यम्। भाष्यभावप्रकाशिकायां तु अयं प्रयोगो दृश्यते- “वेदः, स्वविषयादधिकतरविषयविज्ञानवत उत्पन्नः, वाक्यप्रमाणत्वात् पाणिन्यादिवत्”[३] इति। तादृशस्य ऋग्वेदादिलक्षणस्य शास्त्रस्य महतो भूताद्योनेः यस्मात् संभवः, तस्य ब्रह्मणः सर्वज्ञत्वादिविषये किमु वक्तव्यमित्यर्थः। अत एव भामत्याम्- “नहि ते असाधारणधर्मा अनुभूयमाना अपि शक्या वक्तुम्। न खल्विक्षुक्षीरगुडादीनां मधुररसभेदाः शक्याः सरस्वत्याप्याख्यातुम्”[४] इति श्रीवाचस्पतिमिश्रा वदन्ति। अनेन सर्वप्रपञ्चप्रभवत्वं ब्रह्मणः सिद्धयत्येव। तथा च सर्वज्ञाताज्ञातज्ञानप्रभवत्वमपि

---

[१] परिमले १.१.३

[२] शारीरकभाष्ये १.१.३

[३] तत्रैव १.१.३

[४] भामत्याम् १.१.३

वेदितव्यम्। भगवत्पादेन पुनः यदुक्तम्- "अथवा यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत् स्वरूपाधिगमे"[१] इति, तदपि प्रशस्यतरमेव प्रतीयते। शास्त्रादेवैतादृशं ब्रह्मावगम्यते इति।

अत्रायं विनिश्चयः-

कथमेकस्य सूत्रस्यार्थद्वयं वर्ण्यते अथवा यथोक्तमित्यादिना इति शङ्कायाम्-

अल्पाक्षरमसंदिग्धं सारवद् विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।[२]

इति विश्वतोमुखमित्यनेन नानार्थत्वं दृश्यते तस्मान्नास्ति शङ्कावसरः। अनेकार्थताप्रतिपादनन्तु सूत्राणामलङ्कार एव बोद्धव्यः। उक्तञ्च पञ्चपादिकायाम्- "अतो 'जन्माद्यस्य यतः' शास्त्रप्रमाणकमित्येतावदिदं सूत्रं सदसंदिग्धमनुमानशङ्कानिवृत्तेः पृथक्करणन्तु प्रपञ्चान्तःपातिनः शास्त्रस्यापि हेतुत्वेन सर्वज्ञत्वं सुसम्पादमिति व्याख्यानान्तरेण कथयितुम्"[३] इति।

"उपनिषद्वाक्यरूपस्य शास्त्रस्य तात्पर्येणैवार्थगमकत्वात्"[४] इति विज्ञानभाष्यस्यापि उक्तार्थे एव तात्पर्यं पर्यवस्यति। "ननु तत्र कथं विज्ञानस्य कारणत्वम् इति चेत्- शास्त्रयोनित्वात् इति ब्रूमः विज्ञानं हि शास्त्राणां योनिः।"[५] इत्यादि विज्ञानभाष्यप्रतिपादनाद् विज्ञानं हि ब्रह्म शास्त्राणां योनिः सम्पद्यते। विज्ञानं ब्रह्मेति निरूपणात्। नात्र कश्चन ब्रह्माद्वैतेन विरोधः संलक्ष्यते। विज्ञानवादिनो हि मधुसूदनाचार्याः अद्वैतपक्षमेव मण्डयन्ति। "तस्माद् ब्रह्मैवेदं जगज्जन्मादि कारणम्"[६] इति श्रीओझामहोदयवाक्येन ब्रह्मणः सर्वप्रभवत्वमवगम्यते। विज्ञानजनितत्वाद् विज्ञानप्रभवत्वाच्च विज्ञानमयान्येतानि शास्त्राणि इति विज्ञानभाष्यनिरूपणाद् विज्ञानस्यैव[७] 'सत्यं ज्ञानमनन्तं ब्रह्मेति'[८] श्रुतिवचनाद् बोधो जायते इति। अयमर्थोऽपि

---

[१] शारीरकभाष्ये १.१.३

[२] पञ्चपादिकायाम्- सप्तमवर्णके

[३] तत्रैव सप्तमवर्णके

[४] विज्ञानभाष्ये- १.१.४

[५] तत्रैव

[६] तत्रैव

[७] तत्रैव

[८] तैत्तिरीयोपनिषद्

विज्ञानभाष्ये निगदव्यातमस्ति विस्तरान्नेह प्रतन्यते तत्रैव द्रष्टव्यम् इति। न हि विज्ञानं नाम ब्रह्मणोऽतिरिक्तं किञ्चित् प्रतीयते, नैवातिरिक्तस्य तस्य श्रुतिसमन्वयोऽपि शक्यते वक्तुं, तस्मात् ब्रह्मस्वरूपात्मकेन विज्ञानेन युज्यते जन्मादिकं जगत इति।

द्वितीयसूत्रस्यान्ते भगवत्पादैर्यदुक्तम्-

तस्य च निर्णयवाक्यम्- "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्ति इति। अन्यान्यप्येवं जातीयकानि वाक्यानि नित्य शुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि।"[१] इति। तदपि विज्ञानमानन्दं ब्रह्मेति श्रुत्यभिप्रेतचिदात्मनि ब्रह्मणि पर्यवस्यत्येव। विवरणेऽपि- "विज्ञानमानन्दं ब्रह्मेतिवाक्यपर्यालोचनया च स्वप्रकाशानन्दो ब्रह्मलक्षणमिति"[२] दृश्यते। अत्रेदं तात्पर्यम्- विज्ञानभाष्यकृता यद्विज्ञानं समर्थ्यते तत् किं ब्रह्मणो भिन्नं वा अभिन्नं वेति। आद्ये कथं श्रुतीनां वृत्त्यात्मके ज्ञानेऽनित्ये समन्वयः स्यात्। द्वितीये तर्हि निरूपणे किं वैशिष्ट्यम् इत्याक्षेपः। अतः संक्षेपनिबन्धनमात्रमेतद्भाष्यमिति प्रतीयते। पञ्चपादिकाविवरणे[३]- विज्ञानमेव वृहत्त्वसर्वज्ञत्वादिधर्मवत्तया निरूपाधिब्रह्मस्वरूपलक्षणमिति चेत् न तस्य सुख-दुःखरागद्वेषादिमहासामान्यत्वात् तस्याप्यवान्तरसामान्यव्यक्तौ पर्यवसानं वक्तव्यमिति निरूपणेन आनन्दात्मके एव ब्रह्मणि ब्रह्मत्वसर्वज्ञत्वकारणत्वादिधर्मवत्तया निरूपाधिकं ब्रह्मस्वरूपं निर्णीतम्। यत्र नान्यत् पश्यतीत्यारभ्य "यो वै भूमा तत्सुखमिति सुखस्यैव बृहत्त्वधर्मवत्त्वं प्रतिपाद्यते।

ननु शास्त्रयोनित्वं ब्रह्मणो न सम्भवति प्रमाणान्तरवेद्यत्वाद् ब्रह्मणः अप्राप्ते तु शास्त्रमर्थवद् इति श्रीभाष्यवचनेन शङ्क्यम्- न हि शास्त्रमन्तरा तद्धि ब्रह्म शक्यते ज्ञातुमुपदेष्टुं वा। पराञ्चिखानि व्यतृणत् स्वयंभूरिति[४] श्रुत्या इन्द्रियादिवेद्यत्वं निरस्यते, अनुमानादीनां तु प्रत्यक्षपूर्वकं प्रसरत्वात् तावत् "तं त्वौपनिषदं पुरुषं पृच्छामित्येतत्"[५] अन्यप्रमाणवेद्यत्वं उपनिषन्मात्रवेद्यत्वं चावगन्तव्यं भवति। न च रामानुजाचार्याभिमतं ब्रह्मैव शास्त्रबोध्यमित्यपि स्यात्, असङ्गो ह्ययं पुरुषः इति श्रुतेः[६] निरस्तसमस्तधर्मवर्जितत्वात् निर्विशेषमेव शास्त्रतात्पर्यं ज्ञातव्यम्। न चैतद्विषये वेदान्तानामानर्थक्यं शङ्क्यम्, यतो हि आम्नायस्य

---

[१] शारीरकभाष्ये १.१.२

[२] पञ्चपादिकाविवरणे- पञ्चमवर्णके

[३] तत्रैव पञ्चमवर्णके- पृ० ५४७

[४] कठोपनिषद्- २.१.१

[५] बृहदारण्यकोपनिषद् ३.९.२६

[६] बृहदारण्यकोपनिषद् ४.३.१५

क्रियार्थत्वादानर्थक्यमतदर्थानाम् इति जैमिनिसूत्रेण क्रियापरत्वं हि शास्त्रस्यावगम्यते, अत अक्रियार्थत्वाद् इति। तत्रैव हि विधिः यत्र क्रियाविषयत्वं स्यादत्र तु परिनिष्ठिते वस्तुनि चिदात्मनि नैव विधिः सम्भाव्यते। अग्रे समन्वयनिरूपणे प्रतिपादयिष्यते। अथ समन्वयाधिकरणे चतुर्थे समेषामुपनिषद्वाक्यानां ब्रह्मणि निर्विशेषे समन्वयो दृश्यते। एतेन जिज्ञासाविषयीभूतं ब्रह्म निर्विशेषमेवेति समन्वयसूत्रेण प्रतिपादितं भवति। यतो वेमानीत्यादिश्रुतिवाक्यबोधितं ब्रह्म समन्वयादेवावगम्यते इति भावार्थः। भगवत्पादास्त्वत्र वदन्ति- "तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते। कथम्, समन्वयात्। सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि इति"।[१] अनेन भगवत्पादवाक्येन नहि तत्र प्रधानादौ सविशेषे वाऽपितु निर्विशेष एव चिति वेदान्तानां तात्पर्यं मन्तव्यम्। येन वाक्यमुपक्रम्य येनैवोपसंह्रियते तदेव वाक्यार्थः इति राद्धान्तः। अत एव श्रीवाचस्पतिमिश्रैः- "एवमत्रापि 'सदेव सोम्येदमग्र' इति ब्रह्मोपक्रमात् तत्त्वमसि इति च जीवस्य ब्रह्मात्मनोपसंहारात् तत्परतयैव वाक्यस्य"[२] इति प्रोक्तं भामत्याम्।

विज्ञानभाष्यकृतापि "तत्तु शास्त्रस्य जगत्कर्तृत्वे तात्पर्यं ब्रह्मणि समन्वयात् सिद्धम्"[३] इति प्रतिपादितं चतुर्थसूत्रभावार्थप्रसङ्गे। पुनश्च "दृश्यन्ते हि तानि सर्वाण्येवोपनिषद्वाक्यानि ब्रह्मण्येव सामञ्जस्येनान्वितानि न प्रधानादौ"[४] इति वाक्येनापि विज्ञानभाष्यकृता- समन्वयो दृढीक्रियते। इदमपि ध्येयं यन्मधुसूदनवर्यैरपि न प्रधानादाविति कथनेन प्रधानकारणतावादस्तथैव निराक्रियते यथाभगवत्पादैः अतोऽत्र उभयोः समानतैवायाति। एवञ्च सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति[५] सजातीयादिभेदरहिताद्वितीयेनोपक्रम्य "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि"[६] इति श्रुतिबोधिताद्वितीयेनैवोपसंहारात, मध्ये च तत्त्वमसि इति नवकृत्वोभ्यासात्, प्रमाणान्तरानधिगतस्य चाद्वितीयात्मनः प्रतिपादनात् आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये[७] इति फलसंकीर्तनात्, तथा सृष्टिस्थितिप्रलयाद्यर्थवादवाक्योपादानात्, तथा च मृदादिदृष्टान्तद्वाराद्वितीयस्यात्मनो युक्तिभिर्निरूपणात् तस्य तावन्निर्विशेषेऽद्वैत आत्मनि एव तात्पर्यमवधारितं भवति। एतेन ब्रह्मणः ब्रह्मणि वा शास्त्रप्रामाण्यमपि प्रदर्शितं भवति।

---

[१] शारीरकभाष्यम् १.१.४

[२] तत्रैव भामत्याम्

[३] विज्ञानभाष्यम् १.१.४

[४] तत्रैव १.१.४

[५] छान्दोग्योपनिषद् ६.२.१

[६] तत्रैव

[७] तत्रैव

अत्रेदं वक्तव्यम्-

न हि खलु शास्त्रसमन्वयमन्तरा एतन्निर्विशेषं ब्रह्म निश्चीयते। समन्वयादेव जगज्जन्मादिकर्तृत्वमुपपद्यते ब्रह्मणि। अत्र सम्यगन्वयः समन्वयः, सम्यक्त्वं चापुनरुक्तानेकशब्दानामखण्डैकरसार्थपर्यवसायित्वम् बोध्यम्। तस्माद् वेदान्तानामेकान्ततो ब्रह्मपरत्वं वेदितव्यम्। ननु प्रधानपरिग्रहेऽपि समन्वयो लभ्यते सुखदुःखमोहात्मकस्य जगतः तत् कथं तावदवगम्यते ब्रह्मणि एव समन्वय इति चेन्न चेतनादेव ब्रह्मणः समस्तस्य कार्यजातस्योत्पत्तिः श्रुतिषु श्रूयते न प्रधानाद् इति ध्येयम्। अपि च ईक्षतेर्नाशब्दम्[१] इति सूत्रबलेन ईक्षितृत्वं ब्रह्मण्येव समुपपद्यते न प्रधानादौ, तस्मात् समन्वयात् सर्वासां श्रुतीनां ब्रह्मण्येव तात्पर्यमवगन्तव्यम् इति दिक्। प्रकृतिरूपस्य विकारेऽन्वयदर्शनादिति परिहृतं भगवत्पादैः “न विलक्षणत्वादस्य तथात्वं च शब्दादिति”[२] सूत्रशारीरकभाष्ये नेह प्रतन्यते। रचनानुपपत्तेश्च नानुमानमिति सूत्रेण प्रकृतिकारणवादस्य निराकृतत्वात् प्रधाने तादृशः समन्वयो न सम्भाव्यते। न च परमाणूनां जगत्कारणत्वं सिध्यति। “समवायाभ्युपगमाच्च साम्यादनवस्थितेः”[३] इति सूत्रभाष्ये परमाणुकारणतावादोऽपि निराकृतः।

विज्ञानभाष्येऽपि-

“जगज्जन्मादिकर्तृत्वं ब्रह्मणि सर्वेषां वेदान्तवाक्यानां समन्वयात् सिद्धं भवेत्”[४] इति निगदितम्- पुनश्चाग्रे तत्रैव[५]- तस्मात् संशयोत्पत्तेस्तन्निवृत्यर्थं सर्वेषां कारणवाक्यानां परस्परैकवाक्यतया समन्वयार्थं चोत्तिष्ठते ब्रह्मयाथार्थ्यजिज्ञासेति विज्ञानभाष्यदिशाऽयं समन्वय आवश्यक इति प्रतीयते। न हि समन्वयप्रसादितवस्तुं विना जिज्ञासाऽपि कर्तुं शक्यते। अतः सुष्ठुच्यते श्रीमधुसूदनवर्यैः[६]- अत आवश्यकोऽयं ब्रह्मकारणताविचारारम्भः। विज्ञानभाष्ये ह्यत्र विज्ञानस्य माहात्म्यं ब्रह्मणोऽनन्यत्वं च प्रकट्यते। लोकेऽपि विज्ञानमन्तरा जगदान्ध्यप्रसङ्ग इत्यपि बोध्यते। तत्र हि विज्ञानं ब्रह्मेति प्रतिपादनेन शास्त्रयोनित्वाद् विज्ञानस्य कारणत्वं प्रतिपादितमस्ति। उक्तं हि तत्र- “विज्ञानं हि शास्त्राणां योनिः। विज्ञानादेव हि सर्वाणि शास्त्राणि प्रभवन्ति। कथमवगम्यते इति चेद्-ब्रूमः- तत्तु समन्वयादवगम्यत”[७] इति। अत्र विज्ञानं प्रस्तुत्य तस्यैव विज्ञानस्य जगज्जन्मादिकर्तृत्वमुपपादितं विद्यते। ओझामहोदयदृष्ट्याऽपि एकमेव सद्रूपं विज्ञानं ब्रह्म पारमार्थिकं विद्यते। “अव्ययमक्षरं क्षरमिति त्रेधा विवर्तते

---

[१] ब्रह्मसूत्रम् १.१.५

[२] तत्रैव २.१.४

[३] तत्रैव २.२.१३

[४] विज्ञानभाष्यारम्भे प्रथमसूत्रे

[५] तत्रैव

[६] तत्रैव

[७] तत्रैव विज्ञानभाष्ये

ब्रह्मेति"[१] विज्ञानभाष्यवचनेन विवर्ता यस्यैते वियदनिलतेजोऽबवनयः" इति श्रीवाचस्पतिमतं सिध्यति। एषां मतेऽपि विवर्तवाद एव मन्तव्यः। विज्ञानमानन्दं ब्रह्मेति श्रुत्या ब्रह्मणः स्वरूपमेव विज्ञानमिति ध्यातव्यम्। विज्ञानस्य स्वप्रकाशत्वं तथैव स्वीकर्तव्यमत्र यथोपपादितमस्ति वेदान्तसम्प्रदायग्रन्थविषयेषु। विज्ञानस्य विवर्तभूतं हि चराचरात्मकं जगत् प्रतीयते। लीयते च तस्मिन् विज्ञानात्मनि ब्रह्मणीत्येषो राद्धान्तः।

विज्ञानभाष्ये प्रधानादिजगत्कारणानां स्थाने स्थाने विज्ञानभाष्यकृता निराकरणं कृतं विद्यते। यथा- "एवमेतासु नानाधारासु सर्वत्रैवाद्यस्य यतो जन्मोपपद्यते, तद्ब्रह्म। ननु तत्प्रधानमपि सम्भवति, न ब्रह्मैवेति चेन्न। शास्त्रयोनित्वात्। शास्त्रमिति वेदवचनः शब्दः इह श्वेताश्वतराणामुपनिषदि श्रूयते।"[२] इति। एतेन प्रधानादिनिराकरणेन विज्ञानभाष्यकृताऽपि अद्वैतमार्गो निर्दिश्यते समर्थ्यते च। तस्मात् समन्वयाधिकरणे सर्वासां श्रुतीनां परमं प्रयोजनं तात्पर्यञ्च ब्रह्मैवायाति। ननु शास्त्रान्तरेऽपि एतत्सूत्रं स्वस्वदर्शनरीत्या वर्ण्यते। यथा रामानुजदर्शने विशिष्टाद्वैते सविशेषे भगवति पुरुषोत्तमे सर्वासां श्रुतीनां समन्वयो निगद्यते। प्रतिपाद्यते च भगवता रामानुजेन सर्वेश्वरे सर्वज्ञे एतत्तात्पर्यमिति चेन्न "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमिति"[३] श्रुतिबलेन निर्विशेषमेव ब्रह्मोपक्रमादिभिर्लिङ्गैराद्रियते न तथा सविशेषम् उक्तं हि भगवता भाष्यकृता- "उच्यते- द्विरूपं हि ब्रह्मावगम्यते नामरूपविकारभेदोपाधिविशिष्टं, तद्विपरीतं च सर्वोपाधिविवर्जितम्"[४] इति एतेन सविशेषस्य स्थापनं निविर्विशेप्रतिपत्यर्थमेवेति निश्चीयते। उक्तं हि श्रीवाचस्पतिमिश्रेण "यद्यपि तत्त्वतो निरस्तसमस्तोपाधिरूपं ब्रह्म तथापि न तेन रूपेण शक्यमुपदेष्टुमित्युपहितेन रूपेणोपदेष्टव्यमिति"[५] इति। अतश्च ब्रह्मणो वास्तविकं स्वरूपं निर्विशेषमेवेति बोध्यम्। निम्बार्कवेदान्ते अनन्ताचिन्त्यस्वाभाविकस्वरूपगुणशक्त्यादिभिर्वृहत्तमे रमाकान्ते पुरुषोत्तमे ब्रह्मशब्दाभिधेये एव समन्वयो वक्तव्यः। तदेव विश्वकारणं ब्रह्म शास्त्रप्रमाणकं न कर्मादि इति निम्बार्कमते जिज्ञास्यते। अथ शब्दस्यैषां मतेऽपि आनन्तर्यार्थकत्वं परिगृह्यते। लक्षणमपि द्वितीयसूत्रद्वारेण निम्बार्कभाष्ये-

"अस्याऽचिन्त्यविचित्रसंस्थानसम्पन्नस्यासंख्येयनामरूपादिविशेषाश्रयस्याचिन्त्यरूपस्य विश्वस्य सृष्टिस्थितिलया यस्मात् सर्वज्ञाद्यनन्तगुणाश्रयाद् ब्रह्मेशकालादिनियन्तुर्भगवतो भवन्ति, तदेव तदेव"[६] इति निरूपितमस्ति। एवञ्च शास्त्रयोनित्वमपि तत्र भगवति श्रीकृष्णे उपपद्यते। शास्त्रं वेदः योनिः कारणं ज्ञापकं प्रमाणं यस्मिंस्तच्छास्त्रयोनि तस्य भावस्तत्त्वं तस्माच्छास्त्रयोनित्वाच्छास्त्रप्रमाणकत्वात्। वेदैकप्रमाणकमेव ब्रह्मेति

---

[१] चतुर्थसूत्रस्यान्ते विज्ञानभाष्ये

[२] विज्ञानभाष्ये १.४ सूत्रे

[३] श्वेताश्वतरोपनिषद् ६.१९

[४] शारीरकभाष्यम् १.१.१२

[५] तत्रैव भामत्याम् १.१.१२

[६] वेदान्तपारिजातसौरभभाष्ये १.१.२

सिद्धान्तः। इति वेदान्तकौस्तुभाख्यब्रह्मसूत्रभाष्ये[१] वर्णितमस्ति। जिज्ञास्यं जगत्कारणं ब्रह्म वेदैकप्रमाणकं कुतः समन्वयात्। वेदेषु तस्यैव श्रीकृष्णाख्यस्य ब्रह्मणः सम्यग्वाच्यतयाऽन्वयः समन्वयो दृश्यते। उक्तञ्च कौस्तुभभाष्ये[२]- तस्मात् कृत्स्नस्य वेदस्य सर्वज्ञे स्वाभाविकानन्ताचिन्त्यशक्तौ जगत्कारणे ब्रह्मणि पुरुषोत्तमे चिदचिद्भिन्नाभिन्ने श्रीकृष्णे समन्वय इति सिद्धम्। वैदैश्च सर्वैरहमेव वेद्य इति श्रीमुखवचनादिति प्रतिपादितमस्ति यत्तु-

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।। [३]

इत्यादीनि वचनान्यपि निर्विशेषमेव ब्रह्म बोधयन्ति न सविशेषं, सर्वस्य हि प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वात्। न हि भगवता गीताख्यशास्त्रं ब्रुवता सविशेषं बोध्यतेऽपितुनिर्विशेषमेव। निर्विशेषस्यैव पारमार्थिकत्वावगमात् श्रुत्यनुकूलत्वाच्च शास्त्रतात्पर्यं निश्चीयते। अतश्च निम्बार्काभिमतसविशेषप्रतिपादने श्रुतेर्नैव महत्तात्पर्यं परिकल्पनीयमपितु निर्विशेषे स्वयंप्रकाशे चिदात्मनि। न हि निर्विशेषमन्तरा सविशेषसिद्धिः।

अत्र विशेषः-

यथा ब्रह्माद्वैते जीवो ब्रह्मणो भिन्नो न भवति, तथैव विज्ञानभाष्यकृताऽपि जीवस्य भिन्नत्वं न वक्तव्यम्, अत्राद्वैतपक्ष एव स्वीक्रियते तन्निबन्धनिरूपणैः। किन्त्वत्र निम्बार्कवेदान्ते जीवस्य परमात्मनो भिन्नत्वं अणुत्वञ्चापि आख्यायते। यथा-

ज्ञानस्वरूपञ्च हरेरधीनं शरीरसंयोगवियोगयोग्यम्।
अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववन्तं यदनन्तमाहुः।
अनादिमायापरियुक्तं रूपं त्वेनं विदुर्वै भगवत्प्रसादात्।
मुक्तञ्च भक्तं किल बद्धमुक्तं प्रभेदबाहुल्यमथापि बोध्यम्।।[४] इति प्रोक्तम्।

तेन हि श्रुतीनां समन्वयः दुरुपपाद एवेति। ब्रह्म वेद ब्रह्मैव भवतीति श्रुत्या स जीवो ब्रह्मैव नान्यः, अन्यथा श्रुतौ एवकारस्य वैयर्थ्यम्। न हि उभयोः सत्यत्वे एकत्वमवसीयेत। श्रुतिस्तु एकत्वमनुपश्यतः इत्यादिना तस्यैव

[१] तत्रैव १.१.३

[२] वेदान्त कौस्तुभभाष्ये १.१.४

[३] गीता

[४] तत्रैव, भाष्ये १.१.१

परमात्मनश्चिदः सदेव साम्येत्यादिना पारमार्थिकत्वं निर्दिशति। अतश्च एतत्पारमार्थिकत्वं विज्ञानभाष्यकृताऽपि तथैव उरीक्रियते यथाशारीरकभाष्यादौ वर्णितमस्ति इति।

विज्ञानामृतभाष्ये[१]- 'ब्रह्मविदाप्नोति परं', 'ब्रह्मविद् ब्रह्मैव भवति', 'तमेव विदित्वाति मृत्युमेति' इत्यादिश्रुतिसिद्धपरमपुरुषार्थसाधनताके ब्रह्मज्ञाने विधिः श्रूयते आत्मेत्येवोपासीत इत्यादिरूपः इति दृश्यते। अत एव श्रुतिष्वापाततोऽन्योन्यविरूद्धार्थतायाः शाखाभेदेन प्रतिभासनात् तन्निर्णयाय ब्रह्ममीमांसाशास्त्रस्यावश्यकत्वमिति रीत्या ब्रह्मविचारो विधेय इति निगदितं विज्ञानभिक्षुणा स्वीये प्रबन्धे। भिक्षुणा अथ शब्दार्थोऽपि मङ्गलरूपोऽधिकारवाचक इति व्याख्यायते। एतत् सर्वं यद्यपि शारीकभाष्यकृता निराकृतं विद्यते "नाधिकारार्थः, ब्रह्मजिज्ञासाया अनधिकार्यत्वात्। मङ्गलस्य च वाक्यार्थे समन्वयाभावात्"[२] इति ग्रन्थप्रतिपादनेन। विज्ञानभिक्षुणा सूत्रार्थप्रतिपादने उक्तम्- "इदं सूत्रमारभ्य प्राधान्येन ब्रह्मविचारः तच्छास्त्रमस्माभिः क्रियते"[३] इति। एवमेव विज्ञानभाष्येऽपि "इत आरभ्य विशिष्य ज्ञातुमिष्यते"[४] इत्यादिना अनेन भाष्येण सह विज्ञानभाष्यस्य साम्यं दृश्यते, तथाऽपि पारमार्थिकाद्वैतब्रह्मनिरूपणं तयोः पार्थक्यं निर्दिशति।

द्वितीयसूत्रव्याख्यानं च विज्ञानभिक्षुणा पुरुषविशेषमाश्रित्य कृतं विद्यते। तदुक्तम्- "यतः परमेश्वरादन्तर्लीनप्रकृतिपुरुषाद्यखिलशक्तिकात् स्वतश्चिन्मात्राद् विशुद्धसत्वाख्यमायोपाधिकात् क्लेशकर्मविपाकाशयैरपरामृष्टाच्चेतनविशेषाद्भवति"[५] इति- महदाद्यखिलजगदधिष्ठानकारणत्वं च ब्रह्मणः स्वीकुर्वता भिक्षुणा "तदेवाधिष्ठानकारणं यत्राविभक्तं येनोपष्टब्धं च सदुपादानकारणं कार्याकारेण परिणमते" इति प्रोक्तम्। पुनश्चाग्रे-

यस्य यत्कारणं प्रोक्तं तस्य साक्षान्महेश्वरः।
अधिष्ठानतया स्थित्वा सदैवोपकरोति हिः।।[६]

इति विवृत्तं ब्रह्माधिष्ठाननिरूपणप्रसङ्गे। एतन्मते ब्रह्मणि शास्त्रवचनान्यपि यतो वेमानि इत्यादीनि श्रुतिवचनानि स्मृतिवचनान्यपि च मूलप्रमाणत्वेनोपन्यस्तानि सन्ति भाष्ये। चतुर्थसूत्रव्याख्यानसमये भिक्षुणा "तद् ब्रह्मणो जगज्जन्मादिकारणत्वं तु समन्वयाद् अस्य जगतः कारणरूपे ब्रह्मणि समनुगतत्वाद्, ब्रह्मणश्च

---

[१] विज्ञानामृतभाष्ये आदौ

[२] शारीरकभाष्यम् १.१.१

[३] विज्ञानामृतभाष्ये १.१.१

[४] विज्ञानभाष्ये १.१.१

[५] विज्ञानामृतभाष्ये १.१.२

[६] तत्रैव

कारणरूपेण जगति समनुगतत्वादुपपद्यते इति शेषः" इति भाष्यवचनेन समन्वयो निगद्यते। जन्माद्यस्य यतोऽन्वयादितरतश्चेति श्रीमद्भागवतमहापुराणस्य आदिमश्लोकांशमादाय भिक्षुणा[१] अन्वय हेतुनाऽपि ब्रह्मणो जगत्कारणत्वमुपपादितं विद्यते तच्चिन्त्यम्। सूत्रस्थान्वयशब्दस्य विशिष्टार्थप्रतिपादकत्वात् स एवार्थो नेय इति। एतत् सर्व भिन्नतयैव विज्ञानभाष्ये दृश्यते इतीयान् अत्र विशेषः।

श्रीभाष्ये भगवता रामानुजेन प्रथमसूत्रेऽथशब्दः आनन्तर्यार्थ इति न्यरूपि। ब्रह्मशब्देन चात्र पुरुषोत्तमोऽभिधीयते। यथोक्तं भाष्ये- निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येय- कल्याणगुणगणः पुरुषोत्तमोऽभिधीयते"[२] इति। तस्यैव जिज्ञासा ब्रह्मजिज्ञासेति श्रीभाष्येऽवलोक्यते। श्रीभाष्ये लघुसिद्धान्ते न तावदविद्यानिवृत्तिरूपाख्यो मोक्षः सम्भवति, तत्र हि वेदान्तवाक्यैर्विधित्सितं ज्ञानं किं वाक्याद् वाक्यार्थज्ञानमात्रम् उत तन्मूलमुपासनात्मकमिति वक्तव्यम्। वाक्यजन्यज्ञानस्य हि तस्य विधानमन्तरेणापि वाक्यादेव सिद्धेः, तावन्मात्रेणाविद्यानिवृत्त्युपलब्धेश्चेति श्रीभाष्यकृता प्रपञ्चितमस्ति। निर्विशेषपक्षं खण्डयता श्रीभाष्यकृता प्रथमसूत्रे महापूर्वपक्षः स्थापितः। तदनु स्वबुद्धियुक्तिभिः अद्वैतं खण्डयन् रामानुजाचार्यः "निर्विशेषवस्तुवादिभिर्निर्विशेषे वस्तुनीदं प्रमाणमिति न शक्यते वक्तुम्"[३] इति भजते। सविशेषवस्तुविषयत्वात् सर्वप्रमाणानां न निर्विशेषसिद्धिरिति वर्ण्यते। निर्विशेस्य चितः स्वतः सिद्धत्वात् न तत्र प्रमाणाधीना सिद्धिः इति बोध्यम्। यद्यपि भणितम्- "शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यम्, पदवाक्यरूपेण प्रवृत्तेः पदसंघातरूपस्य वाक्यस्यानेकपदार्थसंसर्गविशेषाभिधायित्वेन निर्विशेषवस्तुप्रतिपादना- सामर्थ्यान्न निर्विशेषवस्तुनि शब्दः प्रमाणमिति[४] श्रीभाष्ये।

अत्र ब्रूमः-

निर्विशेषवस्तुवादिनां मते नायमाक्षेपो युक्तः। लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात् इति भगवत्पादप्रतिपादनस्वारस्यमपि भवति विचारणीयम्। न हि घटपटादयो न सन्ति इति ब्रूमः किन्तु आत्मनिश्चयाद् ते सन्ति एव। तत् केन कं पश्येद् इति[५] श्रुत्या सर्वकारकक्रियाफलनिराकरणश्रवणात् निर्विशेषमेव मन्तव्यम्।

द्वितीयसूत्रे श्रीभाष्ये- "अस्य यतः यस्मात् सर्वेश्वरात् निखिलहेयप्रत्यनीकस्वरूपात् सत्यसंकल्पाज्ज्ञानानन्दाद्यनन्तकल्याणगुणात् सर्वज्ञात् सर्वशक्तेः परमकारुणिकात् परस्मात् पुंसः

---

[१] तत्रैव १.१.४

[२] श्रीभाष्ये १ .१.१

[३] तत्रैव

[४] तत्रैव १.१.१

[५] बृहदारण्यकोपनिषद् २.४.१४

सृष्टिस्थितिप्रलयाः प्रवर्त्तन्ते तद्ब्रह्म इति"[१] सूत्रार्थो वर्णितोऽस्ति। शास्त्रयोनित्वमपि "ब्रह्मज्ञानकारणत्वाच्छास्त्रस्य तद्योनित्वमित्यपि श्रीभाष्ये प्रोक्तं भगवता श्रीभाष्यकृता।[२] यद्यपि विज्ञानभाष्यकृता ओझावर्येण न सविशेषस्य कस्य चित् तादृश उल्लेखः कृतो विद्यते। तत्र हि विज्ञानस्य सर्वप्रभवत्वं तस्यैव च शास्त्रयोनित्वमपि प्रतिपादितं विद्यते। एवञ्च समन्वयाधिकरणे श्रीभाष्यकृता तस्मिन् सविशेषे पुरुषोत्तमे ब्रह्मणि समन्वयात् शास्त्रप्रमाणकत्वमुच्यते- "परमपुरुषार्थतयाऽन्वयः समन्वयः, परमपुरुषार्थभूतस्यैव ब्रह्मणोऽभिधेयतयान्वयात्"।[३] एतत्सर्वं विमृश्यैवोक्तं भाष्यान्ते चतुर्थसूत्रस्य तद्यथा- "अतो 'यतो वा इमानि' इत्यादिवाक्यं निखिलजगदेककारणं निरस्तनिखिलदोषगन्धं सार्वज्ञ्यसत्यसंकल्पत्वाद्यनन्तकल्याणगुणाकरमनवधिकातिशयानन्दं ब्रह्मास्तीति बोधयतीति सिद्धम्"[४] इति।

विज्ञानभाष्यकृता "न खलु जगत्कर्तृत्वेनाभिप्रेतस्य ब्रह्मणस्तावदानन्दमयत्व- व्यवस्थापनमात्रेण निर्विशेषाद्वैतवादः प्रत्याख्यातो भवति। एकमेवाद्वितीयं ब्रह्मेति श्रुत्या निर्विशेषाद्वैतस्य सुप्रतिपन्नत्वात्"[५] इति भाष्यप्रतिपादनेन निर्विशेषं समर्थितम्। सांख्यभिमतप्रधानस्य जगत्कारणत्वं प्रत्याख्यातं विद्यतेऽत्र। "तस्मान्नाचेतनं प्रधानमस्य जगतः कारणं शास्त्रेणाभिप्रेयते इति सिद्धम्"।[६] इत्यादिनाऽचेतनस्य तत्कारणत्वं निरस्यते। "इत्थमयं प्रतिज्ञाविरोधो नामान्यो हेतुश्चकारार्थत्वेन शंकरो भावयति"[७] इत्यादिना भगवत्पादपक्षः समर्थ्यते विज्ञानभाष्ये। अत्र हि राजपण्डितो भवान् श्रीमहेश्वरं करुणाकरं न भजते। परमात्मजीवात्मनोरभेद एव एतद्भाष्ये श्रूयते। "तस्मादानन्दवानानन्दमयः सविशेषो नेह ब्रह्मत्वेन विवक्षितः किन्तु विशुद्ध आनन्द एवेदं निर्विशेषं ब्रह्म शास्त्रेण विवक्ष्यते इत्यहं मन्ये इति आनन्दाधिकरणविज्ञानभाष्यवचनेन रामानुजनिम्बार्कादिमतं निराकृतं वेदितव्यम्- अथ च निर्विशेषं ब्रह्मैव जगतः कारणं नान्यदित्यपि ध्येयम्।

चतुःसूत्र्याः परिशीलनेनेदं खल्ववधारणीयं भवति, यद् विज्ञानभाष्ये यन्निरूपितं ब्रह्म तत्तु निश्प्रपचं निर्विशेषमेव, न सविशेषम्। "तदित्थमद्वैतवादात्मकं स्वमतमत्रैव सूत्रे शङ्करेण प्रकल्प्य बहुधा प्रपञ्चितमित्यवधेयमिति तदनन्यत्वमारम्भणशब्दादिभ्यः इति सूत्रस्थविज्ञानभाष्यदिशा शाङ्करमतं प्रदर्शयता विज्ञानभाष्यकृता जीवब्रह्मणोरनन्यत्वमेव स्वीक्रियते। एवं ब्रह्मैव सत्यमिति सिद्ध्या सर्वेषां विकारजातानां

---

[१] श्रीभाष्ये १.१.२

[२] तत्रैव १.१.३

[३] तत्रैव १.१.४

[४] तत्रैव १.१.४

[५] विज्ञानभाष्ये १.१ (१२-१७)

[६] विज्ञानभाष्ये- ईक्षत्यधिकरणे

[७] तत्रैव

ब्रह्मणोऽन्यत्वं सिद्धं भवति इति तत्रैव प्रतिपादितं विद्यते विज्ञानभाष्ये। तस्माद् विर्विशेषब्रह्मवादपरमिदं भाष्यमिति निश्चीयते।

भगवत्पादीयभाष्ये चतुर्थे सूत्रे- "न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पना युक्ता, श्रुतहान्यश्रुतकल्पना प्रसङ्गात्"[१] इत्यवलोक्यते भाष्यवचः। न चात्र ब्रह्ममीमांसायां श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्विधिदर्शनात् प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्म निश्चेयमिति तन्न, कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्। शारीरं वाचिकं मानसं च कर्म धर्माख्यं अथातो धर्मजिज्ञासा इत्यनेन, तद्विषया जिज्ञासा क्रियते। दृश्यते हि अविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं संसाररूपं सुखदुःखतारतम्यमनित्यमसुखञ्चेति। इह तु अनुष्ठेयकर्मफलविलक्षणं तावन्मोक्षाख्यं नित्यम्। अत एवेदं पारमार्थिकं कूटस्थनित्यं, व्योमवत्सर्वव्यापि निरञ्जनं स्वयंज्योतिःस्वभावमतो महद्वैलक्षण्यमिति। अत एवोक्तम्- "न तु तथा ब्रह्मण उपासनाविधिशेषत्वं सम्भवति, एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः। न ह्येकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः सम्भवोऽस्ति" येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपद्येत"[२] इत्येतेन विधिपक्षो निराकृतो वेदितव्यः। श्रवणादौ यद्यपि विवरणानुसारिणो विधिं मन्वते किन्तु भाष्यकृता भगवता विधिपक्षो निराक्रियत एव। तथैव भामतीकृताऽपि भगवता मिश्रेण विधिः खण्ड्यते एवाऽस्मिन् सन्दर्भे। ततश्च ब्रह्मणः शास्त्रप्रमाणकत्वं सुतरां सिध्यति। इदमपि तावन्मन्तव्यं यच्छारीरकभाष्यभामतीपरम्परावैभवं सर्वैरपि स्वीकरणीयमात्मविद्याप्रतिपत्तये। स्थाने स्थाने च श्रीमधुसूदनाचार्योऽपि परम्परामिमां भजते। तेनापि विधिपक्षो व्युदस्यत एवेति मतिः। सम्वादमिममश्रौषमद्भुतमतो मे प्रकरणेऽस्मिन् दृढा मतिरस्त्यनवद्या।

न चैतद्रूपस्य निर्विशेषस्य ब्रह्मणः कयाचिद्युक्त्या कार्यानुप्रवेशगन्धोऽपि कल्पयितुं शक्यः। अन्यदेव तद् विदितादथो अविदिताधि[३] इति श्रुत्या विदिक्रियाकर्मत्वनिषेधाद् येनेदं सर्वं विजानाति तं केन विजानीया[४]दिति च। ननु अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेन्न शास्त्रस्यास्य अविद्याप्रत्युपस्थापितभेदमात्रपरत्वात्। अत एवोक्तं शारीरकभाष्ये- "प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति"[५] इति। यत्तु विशिष्टाद्वैतवादिभिर्विधौ पक्षपातः प्रदर्शितः, तन्न समीचीनं पश्यामः। आत्मा वाऽरे द्रष्टव्य इत्यादीनि हि वचनानि विधिच्छायानि वचनानि[६] इति भगवत्पादेनोक्तम्। अन्ते च शारीरकमीमांसायाः चतुःसूत्र्याः प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणो न सम्भवति। तदुक्तम्-

---

[१] समन्वयाधिकरणे शारीरकभाष्ये १.१.४

[२] तत्रैव

[३] केनोपनिषद् १.३

[४] बृहदारण्यकोपनिषद् २.४.१३

[५] शारीरकभाष्ये १.१.४

[६] तत्रैव १.१.४

“स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयादिति सिद्धम्”[१] इति भगवता श्रीशङ्करेणोक्तं येन हि शास्त्रैक्यं मन्यते तेनापि भामतीवचनं स्मरणीयं भवति; तद्यथा- “विधयो हि धर्मे प्रमाणम्। ते च साध्यसाधनेतिकर्तव्यताभेदाधिष्ठाना धर्मोत्पादिनश्च तदधिष्ठाना न ब्रह्मात्मैक्ये सति प्रभवन्ति, विरोधादिति”।[२] एतेन दर्शनसार्वभौमवचसा विधिर्न युज्यते निर्विशेषब्रह्ममीमांसायामत्र।

ज्ञानस्य प्रमाणजन्यत्वात् प्रमाणं च यथाभूतवस्तुविषयमेव दृश्यते, अतस्तज्ज्ञानं केनचित् कुशलेनापि कर्तुमकर्तुमन्यथा वा कर्तुं न शक्यं वस्तुतन्त्रत्वाज्ज्ञानस्य। न चेदं ज्ञानं चोदनातन्त्रं न वा पुरुषतन्त्रम्। विधेस्तु चोनातन्त्रत्वं पुरुषतन्त्रत्वं च दृश्यते। अतो महान् भेद इति आकर्ण्यते। 'अहं ब्रह्मास्मि' इत्येतदवसाना एव सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि[३] इति शांकरं वचः सर्वथाऽपि आदारास्पदमिति मन्ये। “ब्रह्मस्वभाव एव मोक्षोऽनाद्यविद्यामलावृत उपासनादिक्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते न तु क्रियते। नाविद्या ब्रह्माश्रया किं तु जीवे, सात्वनिर्वचनीयेत्युक्तं, तेन नित्यशुद्धमेव ब्रह्मेति”[४] वदन्त आचार्याः भामतीकृतः शास्त्रस्यास्य वैशिष्ट्यमुद्घोषयन्ति। अत एवाद्वैतसिद्धौ श्रीमधुसूदनसरस्वत्या “मोक्षं प्राप्त इव स्वयं विजयते”[५] इति न्यरूपि।

अन्ते चाहं त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये इति धिया सर्वमेतद्भगवते श्रीपशुपतये ब्रह्मविद्याधियोनये समर्पये। इति शम्।

## सन्दर्भग्रन्थसूची


१. चतुर्वेदी, शिवदत्त शर्मा, (अनु.) १९९०. शारीरक-विज्ञान, राजस्थान पत्रिका प्रकाशन, जयपुर।

२. त्रिपाठी, केदारनाथ, (सम्पा.) १९७९. विज्ञानामृतभाष्यम्, काशीहिन्दूविश्वविद्यालयः, वाराणसी।

३. पणशीकर, वासुदेव लक्ष्मणशास्त्री, (सम्पा.) पुनर्मुद्रण १९९९. श्रीमद्भगवद्गीता (श्रीमच्छाङ्करभाष्यसहिता आनन्दगिरिव्याख्या-नीलकण्ठी-भाष्योत्कर्षदीपिका-सुबोधिनी-अभिनवगुप्ताचार्यव्याख्या-मधुसूदनी-गूढार्थतत्त्वालोकटीका सहिता) चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।

४. मणिद्राविण, (सम्पा.) २००२. शारीरकमीमांसाभाष्यम् खण्ड-१ (प्रकटार्थविवरण-भाष्यभावप्रकाशिका-न्यायनिर्णय टीकात्रयोपेतम्, शारीरक-न्याय-संग्रहसहिता), श्री दक्षिणामूर्तिमठप्रकाशनम्, वाराणसी।


---

[१] शारीरकभाष्ये

[२] भामत्याम् १.१.४

[३] शारीरकभाष्ये १.१.४

[४] भामत्याम् १.१.४

[५] अद्वैतसिद्धौ मङ्लाचरणे

५. शर्मा, टी. श्रीनिवास, (सम्पा.) पुनर्मुद्रण १९८३. श्रीभाष्यम् (श्रुतप्रकाशिकाटीकायुतम्), भारतीय विद्या प्रकाशन, दिल्ली।

६. शास्त्री, अनन्तकृष्ण, (सम्पा.) १९८२. अद्वैतसिद्धि, परिमल पब्लिकेशन्स, दिल्ली।

७. शास्त्री, अनन्तकृष्ण, (सम्पा.) पुनर्मुद्रण१९८२. ब्रह्मसूत्रशाङ्करभाष्यम् (भामती-कल्पतरु-परिमलटीकोपेतम्), कृष्णदास अकादमी, वाराणसी।

८. शास्त्री, आचार्य जगदीश, (सम्पा.) १९८०. ब्रह्मसूत्रशाङ्करभाष्यम् (भाष्यरत्नप्रभा-भामती-न्यायनिर्णयसमुपेतम्), मोतीलाल बनारसीदास।

९. शास्त्री, एस. सुब्रह्मण्य, (सम्पा.),१९७९. कठोपनिषद् (उपनिषद्भाष्यम् , खण्ड-१), महेश अनुसन्धान संस्थान, वाराणसी।

१०. शास्त्री, एस. सुब्रह्मण्य, (सम्पा.),१९७९. केनोपनिषद् , (उपनिषद्भाष्यम्, खण्ड-१), महेश अनुसन्धान संस्थान, वाराणसी।

११. शास्त्री, एस. सुब्रह्मण्य, (सम्पा.),१९७९. तैत्तिरीयोपनिषद् (उपनिषद्भाष्यम्, खण्ड-१), महेश अनुसन्धान संस्थान, वाराणसी।

१२. शास्त्री, एस. सुब्रह्मण्य, (सम्पा.),१९८२. छान्दोग्योपनिषद् (उपनिषद्भाष्यम् खण्ड-२), महेश अनुसन्धान संस्थान, वाराणसी।

१३. शास्त्री, एस. सुब्रह्मण्य, (सम्पा.),१९८२. तैत्तिरीयोपनिषद् (उपनिषद्भाष्यम् खण्ड-२), महेश अनुसन्धान संस्थान, वाराणसी।

१४. शास्त्री, एस. सुब्रह्मण्य, (सम्पा.),१९८६. बृहदारण्यकोपनिषद् (उपनिषद्भाष्यम् खण्ड-३), महेश अनुसन्धान संस्थान, वाराणसी।

१५. शास्त्री, एस. सुब्रह्मण्य, (सम्पा.),१९९२. पञ्चपादिका (विवरण-तत्त्वदीपन-ऋजुविवरणव्याख्यासंवलिता), महेश अनुसन्धान संस्थान, वाराणसी।

१६. शास्त्री, एस. सुब्रह्मण्य, (सम्पा.),१९९२. पञ्चपादिकातत्वदीपनम् (पञ्चपादिका), महेश अनुसन्धान संस्थान, वाराणसी।